ઓં

પઞ્ચમુખ હનુમત્ કવચં

શ્રી ગણેશાય નમઃ

ઓં અસ્ય શ્રી પઞ્ચમુખહનુમત્ કવચમન્ત્રસ્ય બ્રહ્મા ઋષિઃ
ગાયત્રી ચન્દઃ પઞ્ચમુખવિરાટ્હનુમાન્ દેવતા, હ્રીં બીજં,
શ્રીં શક્તિઃ, ક્રૌં કીલકં, ક્રૂં કવચં ક્રૈં અસ્ત્રાય ફટ્

ઈતિ દિગ્બન્ધઃ

શ્રી ગરુડ ઉવાચઃ–

અથ ધ્યાનં પ્રવક્ષ્યામિ શૃણુ સર્વાંગ સુન્દરિ
યત્ કૃતં દેવદેવેન ધ્યાનં હનુમતઃ પ્રિયં (1)

પઞ્ચવક્ત્રં મહાભીમં ત્રિપઞ્ચનયનૈર્યુતં
બાહુભિર્દશભિર્યુક્તં સર્વ્વકામાર્ત્થસિદ્ધિદં (2)

પૂર્વં તુ વાનરં વક્ત્રં કોટિસૂર્ય સમપ્રભં
દંષ્ટ્રાકરાળવદનં ભ્રુકુટીકુટિલેક્ષણં (3)

અસ્યૈવ દક્ષિણં વક્ત્રં નારસિંહં મહાત્ભુતં
અત્યુગ્રતેજોવપુષં ભીષણં ભયનાશનં (4)

પશ્ચિમં ગારુડં વક્ત્રં વક્રતુણ્ડં મહાબલં
સર્વનાગપ્રશમનં વિષભૂતાદિકૃન્તનં (5)

ઉત્તરં સૌકરં વકત્રં કૃષ્ણં દીપ્તં નભોપમં
પાતાળસિંહવેતાળ જ્વરરોગાદિકૃન્તનં (6)

ઊર્ધ્વં હયાનનં ઘોરં દાનવાન્તકરં પરં
યેન વકત્રેણ વિપ્રેન્દ્ર તારકાખ્યં મહાસુરં (7)

જઘાન શરણં તસ્યાત્ સર્વશત્રુ હરં પરમં
ધ્યાત્વા પઞ્ચ મુખં રુદ્રં હનુમન્તં દયાનિધિં (8)

અંગં ત્રિશુલં ઘડ્વાન્ગં પાશમઙ્કુશપર્વતં
ઉષ્ટિં કૌમોદકિં વૃક્ષં ધારયન્તં કમણ્ડલું (9)

ભિન્દિપાલં ઞ્જાનમુદ્રાં દશભિર્ મુનિપુંગવં
એતાન્યાયુધજાલાનિ ધારયન્થ ભજામ્યહં (10)

પ્રેતાસનોપવિષ્ટં તં સર્વાભરણભૂષિતં
દિવ્યમાલ્યાંબરધરં દિવ્યગન્ધાનુલેપનં
સર્વ્વાશ્ચર્ય મયં દેવં હનુમત્ વિશ્વતોમુખં (11)

પઞ્ચાસ્યમચ્યુતમનેક વિચિત્રવર્ણવકત્રં
શશાઙ્કશિખરં કપિ રાજવર્યં
પીતાંબરાદિ મકુટૈરૂપશોભિતાઙ્કં
પિંગાક્ષમાદ્યમનિશં મનસા સ્મરામિ (12)

મર્ક્કટેશં મહોત્સાહં સર્વ્વશત્રુ હરં પરં
શત્રું સંહર માં રક્ષ શ્રીમન્નાપદમુદ્ધર (13)

ઓં હરિમર્ક્કટમર્ક્કટ મન્ત્રમિદં

પરિલિખ્યતિ લિખ્યતિ વામતલે
યદિ નશ્યતિ નશ્યતિ શત્રુ કુલં
યદિ મુચ્યતિમુચ્યતિ વામલતા (14)

ઓં હરિમર્‍કટાય સ્વાહ!
ઓં નમો ભગવતે પઞ્ચવદનાય પૂર્‍વકપિમુખાય
સકલશત્રુસંહારકાય સ્વાહા!
ઓં નમો ભગવતે પઞ્ચવદનાય દક્ષિણમુખાય
કરાળવદનાય નરસિંહાય સકલભૂતપ્રમથનાય સ્વાહ
ઓં નમો ભગવતે પઞ્ચવદનાય પશ્ચિમમુખાય
ગરુડાનનાય સકલવિષહરાય સ્વાહ !
ઓં નમો ભગવતે પઞ્ચવદનાયોત્તરમુખાયાદિવરાહાય
સકલસન્પત્કરાય સ્વાહ!
ઓં નમો ભગવતે પઞ્ચવદનાયોર્‍દ્ધ્વમુખાય હયગ્રીવાય
સકલજનવશઙ્કરાય સ્વાહ !
ઓં અસ્ય શ્રીપઞ્ચમુખહનૂમન્મન્ત્રસ્ય શ્રિ રામચન્દ્ર ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । પઞ્ચમુખઃ વીરહનૂમાન્ દેવતા ।
હનૂમાનિતિ બીજં । વાયુ પુત્ર ઈતિ શક્તિઃ । અઞ્જનીસુત ઈતિ
કીલકં । શ્રીરામદૂતહનૂમત્પ્રસાદ સિદ્ધ્યર્‍ત્થે જપે વિનિયોગઃ। ઈતિ
ઋષ્યાદિક વિન્યસેત્ ।

અધ કર ન્યાસઃ

ઓં અઞ્જનીસુતાય અંગુષ્ટાભ્યં નમઃ
ઓં રુદ્રમૂર્‍ત્તયે તર્‍જ્જનીભ્યાં નમઃ
ઓં વાયુ પુત્રાય મદ્ધ્યમાભ્યાં નમઃ
ઓં અગ્નિગર્‍ભાય અનામિકાભ્યં નમઃ
ઓં રામ દૂતાય કનિષ્ઠિકાભ્યાં નમઃ

ઓં પઞ્ચમુખહનૂમતે કરતલકર પૃષ્ટાભ્યં નમઃ

ઈતિ કરન્યાસઃ ।

અધઃ હૃદયાદિ ન્યાસઃ

ઓં અઞ્જનીસુતાય હૃદયાય નમઃ ।
ઓં રુદ્રમુર્ત્તયે શિરસે સ્વાહ ।
ઓં વાયુપુત્રાય શિખાયૈ વષટ્ ।
ઓં અગ્નિગર્ભાય કવચાય હૂં ।
ઓં રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ઓં પઞ્ચમુખહનૂમતે અસ્ત્રાય ફટ્ ।
ઓં પઞ્ચમુખહનૂમતે સ્વાહ
ઈતિ હૃદયાદિ ન્યાસઃ

અથ ધ્યાનં

વન્દેવાનર નરસિંહ ખગરાટ્ ક્રીડાશ્વવક્ત્રાન્વિતં ।
દિવ્યાલઙ્કરણં ત્રિપઞ્ચનયનં દેદીપ્યમાનં રુચા ।
હસ્તાબ્જૈર્સિખેઠપુસ્તકસુધાકુંભાઙ્કુશાદિં હલં ।
ઘટ્વાંગં ફણિભૂરુહં દશભુજં સર્વારિવીરાપહં ।

અધ મન્ત્રઃ ।

ઓં શ્રીરામદૂતાય આઞ્જનેયાય વાયુપુત્રાય માહબલપરાક્રમાય
સીતાદુઃખનિવારણાય લઙ્કાદહનકારણાય મહાબલપ્રચણ્ડાય ફાલ્ગુનસખાય
કોલાહલસકલ બ્રહ્માણ્ડ વિશ્વરૂપાય
સપ્તસમુદ્રનિર્લ્લન્ઘનાય પિંગળનયનાયામિતવિક્રમાય

સૂર્યબિંબફલસેવનસ્ય દુષ્ટ નિવારણાય દૃષ્ટિનિરાલઙ્કૃતાય
સઞ્જીવિનીસઞ્જીવિતાઙ્કદલક્ષ્મણમહાકપિસૈન્યપ્રાણદાય
દશકણ્ડવિધ્વંસનાય રામેષ્ટાય મહાફાલ્ગુનસખાય
સીતાસહિત રામવરપ્રદાય ષડ્પ્રયોગાગમ પઞ્ચમુખવીરહનૂમાન્
મન્ત્રજપે વિનિયોગઃ

ઓં હરિ મર્ક્કટ મર્ક્કટાય બંબંબંબંબં વૌષટ્ સ્વાહા ।
ઓં હરિ મર્ક્કટ મર્ક્કટાય ફંફંફંફંફં ફટ્ સ્વાહા ।
ઓં હરિ મર્ક્કટ મર્ક્કટાય ઘેંઘેંઘેંઘેંઘેં મારણાય સ્વાહા ।
ઓં હરિ મર્ક્કટ મર્ક્કટાય લુંલુંલુંલુંલું આકર્ષિતસકલસન્પત્ કરાય સ્વાહા ।
ઓં હરિ મર્ક્કટ મર્ક્કટાય ઢંઢંઢંઢંઢં શત્રુસ્તંભનાય સ્વાહા ।
ઓં ટં ટં ટં ટં ટં કૂર્મમૂર્ત્તયે પઞ્ચમુખવીરહનુમતે પરયન્ત્ર પર તન્ત્રૌચ્ચાડનાય
સ્વાહા ।

ઓં કંખંગંઘંઙં ચંછંજંઝંઞં ટંઠંડંઢંણં
તંથંદંધંનં પંફંબંભંમં યંરંલંવં શંષંસંહં ળંક્ષં સ્વાહા

ઈતિ દિગ્બન્ધઃ

ઓં પૂર્વકપિમુખાયપઞ્ચમુખાયપઞ્ચમુખહનુમતે ટંટંટંટંટં સકલશત્રુસંહરણાય
સ્વાહા ।

ઓં દક્ષિણમુખાય પઞ્ચમુખહનુમતે કરાળવદનાય નરસિંહાય
ઓં હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ સકલભૂતપ્રેતદમનાય સ્વાહા
ઓં પશ્ચિમ મુખાય ગરુડાનનાય પઞ્ચ મુખ હનુમતે મંમંમંમંમં સકલવિષહરાય
સ્વાહા ।
ઓં ઉત્તરમુખાયાદિવરાહાય લંલંલંલંલં નૃસિંહાય નીલકણ્ઠ
મૂર્ત્તયે પઞ્ચમુખ હનુમતે સ્વાહા

ઓં ઊર્ધ્વમુખાય હયગ્રીવાય રુંરુંરુંરુંરું રુદ્રમૂર્ત્તયે સકલ
પ્રયોજન નિર્વાહકાય સ્વાહા
ઓં અઞ્જનીસુતાય વાયુપુત્રાય મહાબલાય સીતાશોક નિવારણાય
શ્રીરામચન્દ્રકૃપાપાદુકાય મહાવીર્યપ્રમથનાય બ્રહ્માણ્ડ નાથાય કામદાય
પઞ્ચમુખવીરહનુમતે સ્વાહા

ભૂતપ્રેતપિશાચબ્રહ્મરાક્ષસસાકિનીડાકીન્યાન્તરીક્ષ ગ્રહ–
પરયન્ત્રપરતન્ત્રોચ્ચાટનાય સ્વાહ ।

સકલપ્રયોજનનિર્વાહકય પઞ્ચવીરહનુમતે શ્રીરામચન્દ્ર વર
પ્રસાદાય જં જં જં જં જં સ્વાહા ।

ઈદં કવચં પઠિત્વા તુ મહા કવચં પઠેન્નરઃ ।
એકવારં જપેત્ સ્તોત્રં સર્વ્વશત્રુ નિવારણં (15) ॥

દ્વિવારં તુ પઠેન્ નિત્યં પુત્ર પૌત્રાપ્રવર્ધનં
ત્રિવારં ચ પઠેન્ નિત્યં સર્વ્વસન્પત્કરં શુભં (16)

ચતુર્વારં પઠેન્નિત્યં સર્વ્વરોગનિવારણં ।
પઞ્ચવારં પઠેન્નિત્યં સર્વ્વલોકવશઙ્કરં (17) ॥

ષટ્વારં ચ પઠેન્નિત્યં સર્વ્વદેવવશંકરં ।
સપ્તવારં પઠેન્નિત્યં સર્વ્વસૌભાગ્યદાયકં (18) ॥

અષ્ટવારં પઠેન્નિત્યમિષ્ટકામાર્થસિદ્ધિતં ।
નવવારં પઠેન્નિત્યં રાજભોગમવાપ્નુયાત્ ॥ (19)

દશવારં પઠેન્નિત્યં ત્રૈલોક્યઞ્જાનદર્શનં ।

રુદ્રાવર્ત્તિં પઠેન્નિત્યં  સર્વ્વસિદ્ધિર્ભવેદ્ધ્રુવં ॥ (20)

નિર્બલો રોગયુક્તશ્ચ મહાવ્યાધ્યદિપીટિતઃ ।
કવચસ્મરણેનૈવ મહાબલમવાપ્નુયાત્ ॥ (21)

॥ ઈતિ શ્રી સુદર્શનસંહિતાયાં શ્રીરામચન્દ્રસીતાપ્રોક્તં
શ્રી પઞ્ચમુખહનુમત્કવચં સંપૂર્ણણં ॥